श्री एकदंत स्तोत्रं

श्री एकदंतस्तोत्रं

गृत्समद उवाच |
मदासुरं सुशांतं वै दृष्ट्वा विष्णुमुखाः सुराः |
भृग्वादयश्च योगींद्रा एकदंतं समाययुः ||1||

प्रणम्य तं प्रपूज्याऽऽदौ पुनस्ते नेमुरादरात् |
तुष्टुवुर्हर्षसंयुक्ता एकदंतं गजाननं ||2||

देवर्षय ऊचुः |
सदात्मरूपं सकलादिभूत-
-ममायिनं सोऽहमचिंत्यबोधं |
अथादिमध्यांतविहीनमेकं
तमेकदंतं शरणं व्रजामः ||3||

अनंतचिद्रूपमयं गणेश-
-मभेदभेदादिविहीनमाद्यं |
हृदि प्रकाशस्य धरं स्वधीस्थं
तमेकदंतं शरणं व्रजामः ||4||

समाधिसंस्थं हृदि योगिनां तु
प्रकाशरूपेण विभांतमेवं |
सदा निरालंबसमाधिगम्यं
तमेकदंतं शरणं व्रजामः ||5||

स्वबिंबभावेन विलासयुक्तं
प्रकृत्य मायां विविधस्वरूपं |
सुवीर्यकं तत्र ददाति यो वै
तमेकदंतं शरणं व्रजामः ||6||

यदीय वीर्येण समर्थभूतं
स्वमायया संरचितं च विश्वं |
तुरीयकं ह्यात्मकवित्तिसंज्ञं
तमेकदंतं शरणं व्रजामः ||7||

त्वदीयसत्ताधरमेकदंतं
गुणेश्वरं यं गुणबोधितारं |
भजंत आद्यं तमजं त्रिसंस्था-
-स्तमेकदंतं शरणं व्रजामः ||8||

ततस्त्वया प्रेरितनादकेन
सुषुप्तिसंज्ञं रचितं जगद्वै |
समानरूपं च तथैकभूतं
तमेकदंतं शरणं व्रजामः ||9||

तदेव विश्वं कृपया प्रभूतं
द्विभावमादौ तमसा विभातं |
अनेकरूपं च तथैकभूतं
तमेकदंतं शरणं व्रजामः ||10||

ततस्त्वया प्रेरितकेन सृष्टं
सुसूक्ष्मभावं जगदेकसंस्थं |
सुसात्त्विकं स्वप्नमनंतमाद्यं
तमेकदंतं शरणं व्रजामः ||11||

तत् स्वप्नमेवं तपसा गणेश
सुसिद्धिरूपं द्विविधं बभूव |
सदैकरूपं कृपया च ते य-
-त्तमेकदंतं शरणं व्रजामः ||12||

त्वदाज्ञया तेन सदा हृदिस्थ
तथा सुसृष्टं जगदंशरूपं |
विभिन्नजाग्रन्मयमप्रमेयं
तमेकदंतं शरणं व्रजामः ||13||

तदेव जाग्रद्रजसा विभातं
विलोकितं त्वत्कृपया स्मृतेश्च |
बभूव भिन्नं च सदैकरूपं
तमेकदंतं शरणं व्रजामः ||14||

तदेव सृष्ट्वा प्रकृतिस्वभावा-
-त्तदंतरे त्वं च विभासि नित्यं |
धियः प्रदाता गणनाथ एक-
-स्तमेकदंतं शरणं व्रजामः ||15||

सर्वे ग्रहा भानि यदाज्ञया च
प्रकाशरूपाणि विभांति खे वै |
भ्रमंति नित्यं स्वविहारकार्या-
-त्तमेकदंतं शरणं व्रजामः ||16||

त्वदाज्ञया सृष्टिकरो विधाता
त्वदाज्ञया पालक एव विष्णुः |
त्वदाज्ञया संहरको हरो वै
तमेकदंतं शरणं व्रजामः ||17||

यदाज्ञया भूस्तु जले प्रसंस्था
यदाज्ञयाऽऽपः प्रवहंति नद्यः |
स्वतीरसंस्थश्च कृतः समुद्र-
-स्तमेकदंतं शरणं व्रजामः ||18||

यदाज्ञया देवगणा दिविस्था
यच्छंति वै कर्मफलानि नित्यं |
यदाज्ञया शैलगणाः स्थिरा वै
तमेकदंतं शरणं व्रजामः ||19||

यदाज्ञया शेष इलाधरो वै
यदाज्ञया मोहद एव कामः |
यदाज्ञया कालधरोऽर्यमा च
तमेकदंतं शरणं व्रजामः ||20||

यदाज्ञया वाति विभाति वायु-
-र्यदाज्ञयाऽग्निर्जठरादिसंस्थः |
यदाज्ञयेदं सचराचरं च
तमेकदंतं शरणं व्रजामः ||21||

तदंतरिक्षं स्थितमेकदंतं
त्वदाज्ञया सर्वमिदं विभाति |
अनंतरूपं हृदि बोधकं त्वां
तमेकदंतं शरणं व्रजामः ||22||

सुयोगिनो योगबलेन साध्यं
प्रकुर्वते कः स्तवने समर्थः |
अतः प्रणामेन सुसिद्धिदोऽस्तु
तमेकदंतं शरणं व्रजामः ||23||

गृत्समद उवाच |
एवं स्तुत्वा गणेशानं देवाः समुनयः प्रभुं |
तूष्णीं भावं प्रपद्यैव ननृतुर्हर्षसंयुताः ||24||

स तानुवाच प्रीतात्मा देवर्षीणां स्तवेन वै |
एकदंतो महाभागान् देवर्षीन् भक्तवत्सलः ||25||

एकदंत उवाच |
स्तोत्रेणाहं प्रसन्नोऽस्मि सुराः सर्षिगणाः खलु |
वृणुध्वं वरदोऽहं वो दास्यामि मनसीप्सितं ||26||

भवत्कृतं मदीयं यत् स्तोत्रं प्रीतिप्रदं च तत् |
भविष्यति न संदेहः सर्वसिद्धिप्रदायकं ||27||

यद्यदिच्छति तत्तद्वै प्राप्नोति स्तोत्रपाठकः |
पुत्रपौत्रादिकं सर्वं कलत्रं धनधान्यकं ||28||

गजाश्वादिकमत्यंतं राज्यभोगादिकं ध्रुवं |
भुक्तिं मुक्तिं च योगं वै लभते शांतिदायकं ||29||

मारणोच्चाटनादीनि राज्यबंधादिकं च यत् |
पठतां शृण्वतां नृणां भवेत्तद्बंधहीनता ||30||

एकविंशतिवारं यः श्लोकानेवैकविंशतिं |
पठेद्वै हृदि मां स्मृत्वा दिनानि त्वेकविंशतिं ||31||

न तस्य दुर्लभं किंचित्त्रिषु लोकेषु वै भवेत् |
असाध्यं साधयेन्मर्त्यः सर्वत्र विजयी भवेत् ||32||

नित्यं यः पठति स्तोत्रं ब्रह्मीभूतः स वै नरः |
तस्य दर्शनतः सर्वे देवाः पूता भवंति च ||33||

एवं तस्य वचः श्रुत्वा प्रहृष्टा अमरर्षयः |
ऊचुः सर्वे करपुटैर्भक्त्या युक्ता गजाननं ||34||

इति श्रीमुद्गलपुराणे एकदंतचरिते पंचपंचाशत्तमोऽध्याये श्री एकदंत स्तोत्रं |